# Shri Durga Ashtottarashata Namavalih 108 Names

# श्रीदुर्गाष्टोत्तरशतनामावलिः

## Document Information

Text title : durgAShTottarashatanAmAvalI 6

File name : durgAShTottarashatanAmAvaliH6.itx

Category : aShTottarashatanAmAvalI, devii, durgA, nAmAvalI, devI

Location : doc_devii

Transliterated by : NA

Proofread by : NA

Latest update : January 8, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 8, 2021

*sanskritdocuments.org*

# श्रीदुर्गाष्टोत्तरशतनामावलिः

ॐ दुर्गायै नमः । कामकलायै । कान्तायै । कपालि प्राणनायिकायै ।
हर्यक्षवाहनारूढायै । हतारये । हरिसोदयै । कमलाक्ष्यै ।
कार्मुकधृते । कनत्कनकमेखलायै । तेजस्विन्यै । त्र्यक्षयुतायै ।
तृतीयस्थानगोचरायै । महिषासुरमूर्ध्निस्थायै । मातङ्गवरकन्यकायै ।
विरूपाक्ष्यै । विश्ववन्द्यायै । विराज्यै । विश्वमोहिन्यै ।
सुरासुरार्चितायै नमः ॥ २०

ॐ सूर्यायै नमः । शुम्भासुरनिषूदिन्यै । रम्भास्थानायै ।
आरम्भफलायै । शिवसौख्यकर्यै । ईश्वर्यै । यज्ञवेद्युद्भवायै ।
यज्ञायै । यतीड्यायै । यत्नपूजितायै । सुरतेजस्समुद्भूतायै ।
सुरायुधवरायुधायै । शम्भुमोहिन्यै । नित्यायै । नियत्यै । नमतां
हितायै । नाथायै । नारायण्यै । नेयायै । नामरूपविवर्जितायै नमः ॥ ४०

ॐ शान्तायै नमः । शान्तिकर्यै । शान्तये । शाश्वत्यै ।
शशिशेखरायै । वेदान्तवेद्यायै । वेदात्मने । वाण्यै । वीणाविनोदिन्यै ।
समर्थायै । सुरथाराद्ध्यायै । सुरनाथार्चितायै । सुधायै ।
समाधिनिष्ठध्येयात्मने । समाधिपरदेवतायै । असमानाधिकायै ।
कर्काभायै । अनङ्गानुग्रहोन्मुख्यै । अपञ्चीकृतभूतात्मने ।
पञ्चीकरण तत्परायै नमः ॥ ६०

ॐ साधुसेव्यायै नमः । सावधानायै । लीलाविग्रहधारिण्यै ।
शक्तिप्रियायै । शक्तिरूपायै । शास्त्र्यै । शक्तिमत्यै ।
शिवायै । रूपिण्यै । रोगसंहर्त्र्यै । रुरुहन्त्र्यै । रुचिप्रदायै ।
हतदैत्यायै । हर्षमय्यै । हेयोपादेयवर्जितायै । यशोदानन्दिन्यै ।
याच्ञादैन्यनाशन तत्परायै । विद्वत्प्रियायै । विशेषज्ञायै ।
विश्वसुवे नमः ॥ ८०

ॐ विन्ध्यवासिन्यै नमः । योगनिद्रायै । योगिवन्द्यायै ।

योनिचक्रप्रपूजितायै । यतदैत्यायै । हैमवत्यै ।
हंसात्मने । हंससेवितायै । त्रिनेत्रायै । त्रिपुरायै ।
त्रात्र्यै । तृतीयगुणवर्जितायै । गर्भसङ्कर्षणकर्यै ।
जाग्रत्स्वप्नसुषुप्त्याख्यावस्थानेकस्थलोककायै ।
जाग्रत्स्वप्नसुषुप्त्याख्यावस्था त्रितयसाक्षिण्यै । निरुपाधये ।
निराक्षेपायै । निष्कलङ्कायै । निराकृतये । सगुणायै नमः ॥ १००

ॐ निर्गुणायै नमः । सान्द्रानन्दायै । अपारदयानिधये । वाराह्यै ।
नारसिंह्यै । कौमार्यै । वैष्णव्यै । वरायै नमः ॥ १०८

इति दुर्गाष्टोत्तरशतनामावलिः समाप्ता ।

*Shri Durga Ashtottarashata Namavalih 108 Names*

pdf was typeset on January 8, 2021

Please send corrections to *sanskrit@cheerful.com*